# shrI sUryAShTottarashatanAma stotram

# શ્રીસૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્ અથવા સૂર્યવરદસ્તોત્રમ્

## Document Information

Text title : sUryAShTottarashatanAmastotram

File name : sUryAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Kirk Wortman kirkwort at hotmail.com

Proofread by : Kirk Wortman kirkwort at hotmail.com, Usha Iyer iyerku at gmail.com

Description-comments : yudhiShThiradhaumyasa.nvAde (Also in brahmapurANa | adhyAya 33/3249||)

Source : mahAbhArate AraNyakaparvaNi, BrihatstotraratnAkara 211

Latest update : March 5, 2011, June 15, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2024

*sanskritdocuments.org*

# શ્રીસૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્ અથવા સૂર્યવરદસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
આચમ્ય ॥

॥ સઙ્કલ્પ ॥

શ્રીસૂર્યનારાયણદેવતામુદ્દિશ્ય પ્રીત્યર્થં,
શ્રીસૂર્યાષ્ટોત્તરશતનામસ્તોત્રમહામન્ત્રપઠનં કરિષ્યે ॥

અસ્ય શ્રીસૂર્યાષ્ટોતરશતનામસ્તોત્રમહામન્ત્રસ્ય, બ્રહ્મા ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીસૂર્યનારાયણો દેવતા ।
હ્રાં બીજં, હ્રીં શક્તિઃ હૂં કીલકં,
શ્રીસૂર્યનારાયણદેવતાપ્રસાદસિદ્ધ્યર્થે
જપે વિનિયોગઃ ।
ન્યાસૌ - કરન્યાસઃ હૃદયન્યાસઃ
ઓં હ્રાં અઘોર શ્રીસૂર્યનારાયણાય - અઙ્ગુષ્ઠાભ્યાં નમઃ - હૃદયાયનમઃ
ૐ હ્રીં ચતુર્વેદપારાયણાય - તર્જનીભ્યાં નમઃ - શિરસેસ્વાહા
ૐ હૂં ઉગ્રભયઙ્કરાય - મધ્યમાભ્યાં નમઃ - શિખાયૈ વષટ્
ૐ હૈં શ્રીસૂર્યનારાયણાય - અનામિકાભ્યાં નમઃ - કવચાય હું
ૐ હૌં કૌપીનમૌઞ્જીધરાય - કનિષ્ઠિકાભ્યાં નમઃ - નેત્રત્રયાય વૌષટ્
ઓં હ્રઃ સહસ્રકિરણાય કરતલકરપૃષ્ઠાભ્યાં નમઃ - અસ્ત્રાય ફટ્
ભૂર્ભુવસ્સ્વરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનં
સુરગણપિતૃયક્ષસેવિતં હ્યસુરનિશાચરસિદ્ધવન્દિતમ્ ।
વરકનકહુતાશનપ્રભં પ્રણિપતિતોઽસ્મિ હિતાય ભાસ્કરમ્ ॥

લમિતિ પઞ્ચપૂજાં કૃત્વા ગુરુધ્યાનં કુર્યાત્ ।
સૂર્યોઽર્યમા ભગસ્ત્વષ્ટા પૂષાર્કસ્સવિતા રવિઃ ।
ગભસ્તિમાનજઃ કાલો મૃત્યુર્ધાતા પ્રજાપતિઃ ॥

વૈશમ્પાયન ઉવાચ ।
શ◌ૃણુષ્વાવહિતો રાજન્ શુચિર્ભૂત્વા સમાહિતઃ ।
ક્ષણં ચ કુરુ રાજેન્દ્ર ગુહ્યં વક્ષ્યામિ તે હિતમ્ ॥ ૧॥

ધૌમ્યેન તુ યથા પ્રોક્તં પાર્થાય સુમહાત્મને ।
નામ્નામષ્ટોત્તરં પુણ્યં શતં તચ્છૃણુ ભૂપતે ॥ ૨॥

ૐ સૂર્યોઽર્યમા ભગસ્ત્વષ્ટા પૂષાર્કઃ સવિતા રવિઃ ।
ગભસ્તિમાનજઃ કાલો મૃત્યુર્ધાતા પ્રભાકરઃ ॥ ૩॥

પૃથિવ્યાપશ્ચ તેજશ્ચ ખં વાયુશ્ચ પરાયણમ્ ।
સોમો બૃહસ્પતિઃ શુક્રો બુધોઽઙ્ગારક એવ ચ ॥ ૪॥

ઇન્દ્રો વિવસ્વાન્દીપ્તાંશુઃ શુચિઃ શૌરિઃ શનૈશ્ચરઃ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સ્કન્દો વૈશ્રવણો યમઃ ॥ ૫॥

વૈદ્યુતો જાઠરશ્ચાગ્નિરૈન્ધનસ્તેજસાં પતિઃ ।
ધર્મધ્વજો વેદકર્તા વેદાઙ્ગો વેદવાહનઃ ॥ ૬॥

કૃતં ત્રેતા દ્વાપરશ્ચ કલિઃ સર્વામરાશ્રયઃ ।
કલા કાષ્ઠા મુહુર્તાશ્ચ પક્ષા માસા ઋતુસ્તથા ॥ ૭॥

સંવત્સરકરોઽશ્વત્થઃ કાલચક્રો વિભાવસુઃ ।
પુરુષઃ શાશ્વતો યોગી વ્યક્તાવ્યક્તઃ સનાતનઃ ॥ ૮॥

લોકાધ્યક્ષઃ પ્રજાધ્યક્ષો વિશ્વકર્મા તમોનુદઃ । કાલાધ્યક્ષઃ
વરુણઃ સાગરોંઽશુશ્ચ જીમૂતો જીવનોઽરિહા ॥ ૯॥

ભૂતાશ્રયો ભૂતપતિઃ સર્વલોકનમસ્કૃતઃ ।
સ્રષ્ટા સંવર્તકો વહ્નિઃ સર્વસ્યાદિરલોલુપઃ ॥ ૧૦॥

અનન્તઃ કપિલો ભાનુઃ કામદઃ સર્વતોમુખઃ ।
જયો વિશાલો વરદઃ સર્વધાતુનિષેચિતા ॥ ૧૧॥ સર્વભૂતનિષેવિતઃ
મનઃ સુપર્ણો ભૂતાદિઃ શીઘ્રગઃ પ્રાણધારણઃ ॥

ધન્વન્તરિર્ધૂમકેતુરાદિદેવોઽદિતેઃ સુતઃ ॥ ૧૨॥

દ્વાદશાત્મારવિન્દાક્ષઃ પિતા માતા પિતામહઃ ।
સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ॥ ૧૩॥

દેહકર્તા પ્રશાન્તાત્મા વિશ્વાત્મા વિશ્વતોમુખઃ ।
ચરાચરાત્મા સૂક્ષ્માત્મા મૈત્રેણ વપુષાન્વિતઃ ॥ ૧૪॥

એતદ્વૈ કીર્તનીયસ્ય સૂર્યસ્યૈવ મહાત્મનઃ । સૂર્યસ્યામિતતેજસઃ
નામ્નામષ્ટશતં પુણ્યં શક્રેણોક્તં મહાત્મના ॥ ૧૫॥ પ્રોક્તમેતત્સ્વ્યમ્ભુવા

શક્રાચ્ચ નારદઃ પ્રાપ્તો ધૌમ્યશ્ચ તદનન્તરમ્ ।
ધૌમ્યાદ્યુધિષ્ઠિરઃ પ્રાપ્ય સર્વાન્કામાનવાપ્તવાન્ ॥ ૧૬॥

સુરપિતૃગણયક્ષસેવિતં હ્યસુરનિશાચરસિદ્ધવન્દિતમ્ ।
વરકનકહુતાશનપ્રભં ત્વમપિ મનસ્યભિધેહિ ભાસ્કરમ્ ॥ ૧૭॥

સૂર્યોદયે યસ્તુ સમાહિતઃ પઠેત્સ પુત્રલાભં ધનરત્નસઞ્ચયાન્ ।
લભેત જાતિસ્મરતાં સદા નરઃ સ્મૃતિં ચ મેધાં ચ સ વિન્દતે પરામ્ ॥ ૧૮॥

ઇમં સ્તવં દેવવરસ્ય યો નરઃ પ્રકીર્તયેચ્છુચિસુમનાઃ સમાહિતઃ ।
વિમુચ્યતે શોકદવાગ્નિસાગરાલ્લભેત કામાન્મનસા યથેપ્સિતાન્ ॥ ૧૯॥

સ્વર્ભુવર્ભૂરોમિતિ દિગ્વિમોકઃ ।
હરિઃ ઓં તત્સત્ ।
શ્રીસૂર્યનારાયણપરબ્રહ્માર્પણમસ્તુ ।

॥ ઇતિ શ્રીમહાભારતે યુધિષ્ઠિરધૌમ્યસંવાદે
આરણ્યકપર્વણિ શ્રીસૂર્યાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

ઇતિ બ્રહ્મપુરાણે ત્રયસ્ત્રિંશાધ્યાયાન્તર્ગતં
સૂર્યનામાષ્ટોત્તરશતસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્મપુરાણ । અધ્યાય ૩૩/૩૨-૪૯॥

Also, with slight differences in
brahmapurANa . adhyAya 33/32-49..

(If this stotra is recited everyday morning, one will be rid
of all sorrows and will be blessed with wealth, courage, progeny,
knowledge, happiness, marriages, etc.)

Encoded by Kirk Wortman kirkwort@hotmail.com, NA
Proofread by Kirk Wortman and Usha Iyer, NA

*shrI sUryAShTottarashatanAma stotram*

pdf was typeset on September 17, 2024

Please send corrections to *sanskrit@cheerful.com*